E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.328

केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः
देवभूमि-सौरभम्
Devabhūmisaurabham
E-ISSN 2584-2870

Vol 3 Issue 1 Jan-June 2026 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# राधावल्लभाभिराजराजेन्द्राचार्ययोः काव्यलक्षणविमर्शः

वसन्त-चन्द्रः
शोधच्छात्रः, संस्कृतविभागः,
रामकृष्णमिशन् विद्यामन्दिरम्, बेलूरमठः,
Email ID: shrimanbasanta@gmail.com

## शोधसारः-

प्राचीनकालादेव संस्कृतकाव्यस्वरूपनिरूपणे नैके आलङ्कारिका नैकधा प्रयत्नं कृतवन्तः। तेषु केचन आलङ्कारिकाः शब्दार्थयोरुभयोरेव काव्यपदवाच्यतां स्वीकुर्वन्तः काव्यलक्षणं निरूपितवन्तः। पुनः केचित् शब्दस्यैव काव्यपदवाच्यताम् अङ्गीकुर्वन्तः काव्यस्वरूपनिरूपणे प्रवृत्ताः। भामहः वामनः रुद्रटः कुन्तकः मम्मटः इत्यादिभिः आलङ्कारिकैः शब्दार्थयोरुभयोः काव्यपदवाच्यता स्वीकृता। दण्डी विश्वनाथः जगन्नाथः इत्यादयः आलङ्कारिकाः शब्दस्यैव काव्यपदवाच्यतां स्वीकुर्वन्ति। न केवलं प्राचीना आलङ्कारिकाः, आधुनिका अपि नैके आलङ्कारिकाः काव्यस्य स्वरूपनिरूपणे प्रवृत्ताः। अत्र मया आधुनिकयोः राधावल्लभत्रिपाठि-अभिराजराजेन्द्रमिश्रमहोदययोः काव्यलक्षणविषये संक्षपेण आलोचना कृता। राधावल्लभत्रिपाठिमहोदयमते काव्यलक्षणं भवति 'लोकानुकीर्तनं काव्यम्' इति । लोकशब्देनात्र यदेव भासते प्रकाशमायाति तल्लोक इत्यर्थो ग्राह्यः। लोक इत्यनेन न केवलं जनः, अपि तु चराचरं जगदपि गृह्यते। तेन अभिनवभारतीकारेण स्वीकृतम्- लोको नाम जनपदवासी जनः इति,

तथा च स्थावरजङ्गमात्मको लोक इति काव्यहेतुनिरूपणकाले मम्मटेन स्वीकृतं च मतं निराक्रियते। स च लोकः आधिभौतिकाधिदैविकाध्यात्मिकभेदेन त्रिविधो भवति। एतत् पञ्चभूतात्मकम् अन्तर्बाह्यकरणानुभूयमानं समग्रं जगद् भवति आधिभौतिकम्। मानससाक्षात्कारजनितो लोको भवति आधिदैविकः। वस्तुनः आन्तरिकं रूपं भवति अध्यात्मम्। अथवा अध्यात्ममिति क्रियाविशेषणं भवति, आत्मनि आत्मने आत्मना वा अध्यात्मम्। अत्र लोकशब्देन त्रयाणामेव लोकानां ग्रहणं भवति। एवम्विधलोकस्य अनुकीर्तनं काव्यं भवति। अनुकीर्तनं शब्दैः पुनः आविष्करणम्। एतेन अनुकीर्तनेन काव्यं पूर्णतां लभते, एषा पूर्णता एव अलङ्कारः। अनून्मीलनानुदर्शनानुभवानुव्याहरणभेदेन अनुकीर्तनं चतुर्विधं भवति। अभिराजराजेन्द्रमिश्रस्य काव्यलक्षणं तावत्- ''काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजम्।'' इति। आख्यानपदेन शब्दार्थयोरुभयोः साहित्यं व्यज्यते। एतेन वक्रोक्तिजीवितकार-काव्यप्रकाशकारयोर्मतं समर्थितम्। तच्च काव्यं लोकोत्तरं भवति। लोकोत्तरपदेन रमणीयार्थत्वपक्षधारिणो रसगङ्गाधरकारस्य मन्तव्यमनुमोदितं भवति। तच्च काव्यं रसगर्भं स्यात्। अर्थात्, सद्यः अलौकिकानन्दप्रदेन रसेन प्रत्यङ्गम् अनुबिद्धं भवति। 'रसगर्भम्' इति पदग्रहणेन 'वाक्यं रसात्मकं काव्यम्' इति मतस्थापकस्य विश्वनाथकविराजस्य भावोऽनुमोदितो भवति। काव्यं भवति स्वतःस्फूर्तं किमपि भावोच्छलनम्। शास्त्राद्यन्यवाङ्मयवत् काव्यं कृत्रिमप्रयत्नेन न सिध्यति। उभयोः मतयोर्मध्ये वैपरीत्यं विद्यते। तथा हि अभिराजराजेन्द्रमिश्रमहाभागैः काव्यस्य लोकोत्तरत्वं प्रतिपादितम्, परन्तु राधावल्लभत्रिपाठिमहोदयैः काव्यस्य लोकानुवर्तित्वमेव प्रतिपादितम्। त्रिपाठिमहोदयमते लोकान्तर्गतमेव सर्वम्। ब्रह्म अपि लोकानुवर्ति। लोकोत्तीर्णं किमपि न भवत्येव। परन्तु अभिराजराजेन्द्रमिश्रमते तु काव्यं लोकोत्तरं स्यात्। तेन मम्मटकुन्तकादीनां मतं समर्थितम्।

- **कूटशब्दाः**- लोकानुकीर्तनम्, लोकोत्तरम्, आख्यानम्, रसगर्भम्, स्वभावजम्, काव्यम्।

> प्रस्तावना-

प्राचीनकालादेव संस्कृतकाव्यस्वरूपनिरूपणे नैके आलङ्कारिका नैकधा प्रयत्नं कृतवन्तः। तेषु केचन आलङ्कारिकाः शब्दार्थयोः उभयोः एव काव्यपदवाच्यतां स्वीकुर्वन्तः काव्यलक्षणं निरूपितवन्तः। पुनः केचित् शब्दस्यैव काव्यपदवाच्यताम् अङ्गीकुर्वन्तः काव्यस्वरूपनिरूपणे प्रवृत्ताः। भामहः वामनः रुद्रटः कुन्तकः मम्मटः इत्यादिभिः आलङ्कारिकैः शब्दार्थयोः उभयोः काव्यपदवाच्यता स्वीकृता। तथा हि प्राचीनालङ्कारिको भामहः तदीये *काव्यालङ्कारग्रन्थे* शब्दार्थयोः उभयोः काव्यपदवाच्यतां स्वीकुर्वन् काव्यलक्षणं निरूपयति- ''शब्दार्थौ सहितौ काव्यम्''[1] इति। वामनेन *काव्यालङ्कारकारिकायाम्* उक्तम्- ''काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्तते।''[2] इति। रुद्रटोऽपि *काव्यालङ्कारे* काव्यलक्षणं प्रतिपादयति- ''ननु शब्दार्थौ काव्यम्''[3] इति। *वक्रोक्तिजीविते* कुन्तकाचार्येणापि निगद्यते-

''शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।''[4] इति।

राजानकमम्मटाचार्योऽपि *काव्यप्रकाशे* शब्दार्थयोः उभयोः काव्यपदवाच्यतां स्वीकुर्वन् काव्यलक्षणं प्रतिपादयति- ''तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि''[5] इति। दण्डी विश्वनाथः जगन्नाथः इत्यादयः आलङ्कारिकाः शब्दस्यैव काव्यपदवाच्यतां स्वीकुर्वन्ति। तथा हि दण्डिना *काव्यादर्शे* काव्यलक्षणं क्रियते- ''शरीरं तावदिष्टार्थव्यवच्छिन्ना पदावली''[6] इति। कविराजविश्वनाथोऽपि काव्यलक्षणं निरूपयति- ''वाक्यं रसात्मकं काव्यम्''[7] इति। पण्डितराजजगन्नाथेन *रसगङ्गाधरे* उच्यते- ''रमणीयार्थप्रतिपादकः शब्दः काव्यम्''[8] इति। न केवलं प्राचीना आलङ्कारिकाः, आधुनिका अपि नैके आलङ्कारिकाः काव्यस्य स्वरूपनिरूपणे प्रवृत्ताः। तथा हि आधुनिकाचार्यो हरिदाससिद्धान्तवागीशः शब्दार्थयोः उभयोः काव्यपदवाच्यतां स्वीकुर्वन् *काव्यकौमुद्यां* काव्यलक्षणं कृतवान्- ''मनोहारिणौ शब्दार्थौ काव्यम्''[9] इति। रेवाप्रसादद्विवेदिमहोदयेनापि *काव्यालङ्कारकारिकायां* काव्यलक्षणं निरूपितम्-

''आनन्दकोषस्योल्लासे लोकोत्तरविभावना।

अलङ्कृतार्थसंवित्तिः कविता सर्वमङ्गला।।''[10] इति।

एवम् आधुनिका राधावल्लभत्रिपाठी अभिराजराजेन्द्रमिश्रः ब्रह्मानन्दशर्मा शिवाजीवोपाध्यायः इत्यादयो वरिष्ठा आलङ्कारिकाः काव्यलक्षणं निरूपितवन्तः। एतेषु आचार्येषु राधावल्लभत्रिपाठि- अभिराजराजेन्द्रमिश्रमहोदययोः काव्यलक्षणविषये आलोचनात्र मया करिष्यते।

- विषयोपस्थापनम्-

## राधावल्लभत्रिपाठिमहोदयमते काव्यलक्षणम्-

आधुनिक आलङ्कारिको राधावल्लभत्रिपाठिमहोदयः प्राचीनानां भामहमम्मटादीनाम् आलङ्कारिकाणां काव्यलक्षणानि परिशील्य *अभिनवकाव्यालङ्कारसूत्रम्* इत्याख्ये ग्रन्थे काव्यलक्षणं करोति-

''लोकानुकीर्तनं काव्यम्।''[11] इति।

लोकृ-धातोः घञ्प्रत्ययेन लोकशब्दो निष्पद्यते। लोकयति भासते लोकते पश्यति वा इति लोकः। लोकशब्देनात्र यदेव भासते प्रकाशमायाति तल्लोक इत्यर्थो ग्राह्यः। तेन अभिनवभारतीकारेण स्वीकृतं लोको नाम जनपदवासी जनः इति, तथा च स्थावरजङ्गमात्मको लोक इति काव्यहेतुनिरूपणकाले मम्मटेन स्वीकृतं मतं निराक्रियते। लोक इत्यनेन न केवलं जनः, अपि तु चराचरं जगदपि गृह्यते। न केवलं स्थावरजङ्गमात्मकम्, अपि तु चेतनरूपेण विभाव्यमानं सर्वमेव भुवनं लोक इति वाच्यम्। लोकोऽयं न स्थाणुः, न वा स्थिरः अपि तु प्रतिक्षणं परिवर्तमानो विकासशीलश्च भवति।

प्रसङ्गतः सीमितेऽर्थेऽपि लोकशब्दः प्रयुज्यते, यथा 'लोकोऽयं भारतं वर्षम्'[12] इति। एतेन भारतवर्षतो बहिः वर्ण्यमाणेऽतिव्याप्तिर्न भवतीति मन्तव्या। दिव्येन चक्षुषा चर्मचक्षुषा वा कविना यत् साक्षात्क्रियते सोऽपि लोकः।

स च लोकः आधिभौतिकाधिदैविकाध्यात्मिकभेदेन त्रिविधो भवति। तथाहि उच्यते- ''स च लोकस्त्रिविधः।''[13] ''आधिभौतिक आधिदैविक आध्यात्मिकश्च।''[14] एतत् पञ्चभूतात्मकम् अन्तर्बाह्यकरणानुभूयमानं समग्रं जगद् भवति आधिभौतिकम्। आम्नायते च तैत्तिरीयोपनिषदि-

''पृथिव्यन्तरिक्षं द्योर्दिशोऽवान्तरदिशः अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि आप औषधयो वनस्पतय आकाश आत्मा इत्यधिभूतम्।''[15] इति।

मानससाक्षात्कारजनितो लोको भवति आधिदैविकः। अत्र ज्ञानेन्द्रियव्यापारस्यैव प्राधान्यमस्ति। वस्तुनः आन्तरिकं रूपं भवति अध्यात्मम्। अथवा अध्यात्ममिति क्रियाविशेषणं भवति, आत्मनि आत्मने आत्मना वा अध्यात्मम्। आत्मसम्बन्धीत्यर्थः। एषु त्रिषु लोकेषु एव समेषां तत्त्वानाम् अन्तर्भावः। एतदतिरिक्तं किमपि नास्ति। तथा हि उच्यते-

''आब्रह्मस्तम्बावधि लोकः प्रसृतः सनातनोऽक्षय्यः।

लोकाद् बहिर्न किञ्चिल्लोके सर्वं प्रतिष्ठितं च।।''[16] इति।

परमसत्ता या वर्तते, सा तु न लोकोत्तरा। तत् सृष्ट्वा तदेवानुप्राविशदित्याद्युक्तेः। श्रुतौ समाम्नातं ब्रह्म अपि लोक एव, न तु लोकातिक्रान्तम्। ये योगिनः परब्रह्मणः साक्षात्काराय कठोरं तप आचरन्ति, ते अस्मिन् लोके स्थित्वा एव कुर्वन्ति, न तु अन्यत्र गत्वा। अतः तस्य परब्रह्मणः लोकान्तर्वर्तित्वं सिद्धमेव। अनेन यत्केषाञ्चन मतं यद् अलौकिकं वस्तु काव्ये वर्णयति कविः इति तेषां मतमपि अपास्तम्। यल्लोकान्तर्गतं नास्ति, तस्य काव्येऽपि अन्तर्भावो न भवति। प्रश्नो जायते, प्राचीनैः आलङ्कारिकैः यल्लोकत्तरत्वमुक्तम्, तस्य सङ्गतिः कथं स्यात्। यथा वक्रोक्तिजीवतकारेण कुन्तकेन उक्तम्- ''लोकोतरचमत्कारकारिवैचित्र्यसिद्धये''[17] इति।

मम्मटाचार्येणापि उक्तम्- ''लोकोत्तरवर्णनानिपुणः कविकर्म काव्यम्''[18] इति। ध्वन्यालोकलोचनकारेण अभिनवगुप्तपादार्येणापि अनुरूपं मतं प्रतिपादितम्। एतानि मतानि कथं सङ्गच्छन्ते इति चेदुच्यते- ''वस्तुत एतासूक्तिषु लोक इति पदेन क्वचिदापाततो स्थिरमिति विभाव्यमानं वस्तुस्वरूपं वस्तुन आधिभौतिकं वा रूपमेव गृह्यते। इदमाधिभौतिकं रूपं भवत्येव काव्यस्याधारभूतम्, परन्तु न तन्निरूपण एव काव्यं पर्यवस्यति। तस्मिन् प्रतिष्ठितमपि काव्यं तदतिक्रामति। इदं तावत् काव्यस्यासाधारणत्वमसामान्यत्वं वा। अतश्च कारिकाया 'लोकोत्तरचमतकारकारिवैचित्र्यसिद्धये' इति पदं व्याचिख्यासुः कुन्तक आह- असामान्याह्लादविधायिविचित्रभावसम्पत्तये इति।''[19] इति।

''लोकानुकीर्तनं काव्यम्'' इति यत्काव्यलक्षणम् उल्लिखितम्, तत्र लोक इत्यनेन त्रयाणां लोकानामेव ग्रहणं भवति, न केवलम् आधिभौतिको लोकः। अनेन त्रैकालिकत्वमपि काव्यस्य सिध्यति। यतो हि प्रायः वर्तमानेन अनुबिद्धं भवति आधिभौतिकं जगत्, आधिदैविकम् आध्यात्मिकं च भूतभविष्यत्कालाभ्याम् अनुबिद्धे।

त्रिविधतां लब्धोऽयं लोकः प्रतीक्षणे नवीनो भवति, परिस्पदन्दते, परिवर्तते च। काव्ये निरूपितः सन् आनन्त्यं धत्ते। उक्तं च आनन्दवर्धनेन-

''अवस्थादेशकालादिविशेषैरपि जायते।

आनन्त्यमेव लोकस्य वाच्यस्यापि स्वभावतः।।''[20] इति।

जङ्गम्यमानत्वाद् गतिशीलत्वाच्च लोकस्यास्य जगदिति नाम्ना व्यपदेशः। काव्ये त्रिषु लोकेषु कस्यचिदेकस्य निरूपणं भवति। यथा कालिदासविरचते *मालविकाग्निमित्रे* आधिभौतिकजगत्, *अभिज्ञानशकुन्तले विक्रमोर्वशीये* च प्राधान्येन आधिदैविकजगद्, योगिनः अरविन्दस्य *सावित्री*महाकाव्ये च आध्यात्मिकं जगत् प्राधान्येन कीर्त्यते। राधावल्लभत्रिपाठिमहोदयेन निरूपिते *अभिनवकाव्यालङ्कारसूत्रे* आधिभौतिकजगद् विना संश्रितौ सन्न्यासापवर्गौ न वास्तविकौ, तादृशौ सन्न्यासापवर्गौ न कामनीयौ इत्यभिप्रायः। तस्माद्

आधिभौतिकत्वेऽपि आधिदैविकाध्यात्मिकयोः अवतरणम् अभिप्रेतम्। वस्तुतः काव्ये एतेषु त्रिषु एकं विहाय अपरं न अवतिष्ठते। एतेनैव पुरुषार्थसिद्धिः साहित्येऽपि। आधिभौतिकेन अर्थः, आधिदैविकेन कामः, आध्यात्मिकेन धर्ममोक्षौ च सिध्यन्ति। पुरुषार्थचतुष्टयेऽपि यो धर्मपूर्वकः अर्थः कामो वा, स वस्तुतः अर्थः कामो वा। अर्थेन विना कामेन विना च वस्तुतो धर्मः, धर्मार्थकामान् विहाय च कथं मोक्ष इति चत्वारोऽपीमे परस्परमनुषक्तास्तथैव काव्ये आधिभौतिकाधिदैविकाध्यात्मिकतत्त्वविलसितं समन्वितम्। अत एवोच्यते- ''अनुषक्तत्वं चैतेषां त्रयाणाम्''[21] इति।

एषाम् आधिभौतिकाधिदैविकाध्यात्मिकतत्त्वानां विकसनं समुल्लसनं च जीवनम्। राधावल्लभत्रिपाठिमहोदयमते आधिभौतिकाधिदैवकाध्यात्मिकभेदेन जीवनं त्रिविधम्। एवम्विधलोकस्य अनुकीर्तनं काव्यं भवति। अनु पश्चात् कीर्तनं कथनं काव्यं भवति। एतेन लोकस्य पूर्ववर्तिता, काव्यस्य च पश्चाद्वर्तिता च नियता। अनुकीर्तनं शब्दैः पुनः आविष्करणम्। शब्दाः च सार्था भवन्ति। एवम् अनुकीर्तनम् इत्युक्ते पदेन दोषरहितयोः सगुणयोः सालङ्कारयोः रसाभिव्यञ्जकयोश्च शब्दार्थयोः सङ्ग्रहः। एतेन अनुकीर्तनेन काव्यं पूर्णतां लभते, एषा पूर्णता एव अलङ्कारः। अनून्मीलनानुदर्शनानुभवानुव्याहरणभेदेन अनुकीर्तनं चतुर्विधं भवति। एतेषां चतुर्णाम् अनुकीर्तनानां विषये उच्यते- ''यद्धि लोक इति जीवनमिति वा निरूपयितुमुपरिष्टात् 'एतेषां त्रयाणामाधिभौतिकाधिदैविकाध्यात्मिकलोकानां सकलः समुल्लासो जीवन'मिति कथयता ग्रन्थकृता, तस्य कवयितुर्मानसे प्रथम उन्मेषो नामानून्मीलनम्। उन्मिषितायास्तस्याः कवयित्रा स्वान्तश्चेतसि दर्शनमेवानुदर्शनम्। अनुदृष्टायास्तस्या वर्णनाय वस्तुनो रूपस्य शब्दार्थयोर्वाविष्कारोऽनुभवः। अनुभूतायास्तस्याः स्फुटैः शब्दैर्गोचरीभवितुमर्हैः कथनमनुव्याहरणम्। अनुव्याहरणेन पद्यात्मकत्वेन वैखरीरूपमापद्यते काव्यम्।''[22] इति।

## अभिराजराजेन्द्रमिश्रस्य काव्यलक्षणम्-

अभिराजराजेन्द्रमिश्रमहाभागैः काव्यस्य लक्षणं कृतम्-

“काव्यं लोकोत्तराख्यानं रसगर्भं स्वभावजम्।”[23] इति।

अर्थात्, लोकोत्तरम् आख्यानमेव काव्यम्, तच्च आख्यानं रसात्मकम्, स्वभावजम्, इहलोकपरलोकयोः सहजेन यशःप्राप्तिरूपप्रयोजनसम्पन्नं च भवति। लक्षणेऽस्मिन् आख्यानम् इति विशेष्यपदम्। लोकत्तरम्, रसगर्भम्, स्वभावजम् चेति विशेषणपदानि। अत एव आख्यानं काव्यम् इत्युक्तं भवति। तच्चाख्यानम् लोकोत्तरम्, रसगर्भम्, स्वभावजं च स्यात्।

अत्र प्रत्येकं पदं विश्लिष्यते-

१. आख्यानम्- आख्यानपदेन शब्दार्थयोः साहित्यं व्यज्यते-

“शब्दार्थसंगमेनैव किंचिदाख्यातुमिष्यते।

ततश्चोभयसाहित्यं काव्यपर्यायगोचरम्।।”[24] इति।

अर्थात्, न केवलं शब्दः न केवलम् अर्थो वा काव्यपदवाच्यो भवितुं शक्नोति। शब्दार्थयोः समष्ट्या एव किमपि वर्णयितुं शक्यते, अतः शब्दार्थयोः समष्टिरेव काव्यपदवाच्या भवति। शब्दार्थौ उभौ मिलित्वा काव्यं भवति। उच्यते हि *वक्रोक्तिजीविते* कुन्तकाचार्य्येण-

“शब्दार्थौ सहितौ वक्रकविव्यापारशालिनि।

बन्धे व्यवस्थितौ काव्यं तद्विदाह्लादकारिणि।।”[25] इति।

अनुरूपमेव कथनं *काव्यप्रकाशस्य* बालबोधिनीटीकायां झलकीकरेणोच्यते- “शब्दार्थयुगलं काव्यमित्युच्यते, इति यावत्। आस्वादव्यञ्जकत्वस्योभयत्राप्यविशेषात्। प्रागुक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च। ‘काव्यं पठितं श्रुतं गीतं रचितं’, ‘काव्यं बुद्धम्’ इत्युभयविधव्यवहारदर्शनाच्चेति भाव इत्युद्द्योते स्पष्टम्।”[26] इति। अतः शब्दार्थयोरुभयोः साहित्यं सहचारितैव आख्यानम्। अत्र अभिराजराजेन्द्रमिश्रमहोदयेन शब्दमात्रैकनिष्ठकाव्यत्वरूपमतस्य निराकरणं कृतम्-

'न कोऽप्येवंविधश्शब्दो योऽर्थविरहितः स्यात्। न चाप्यर्थः शब्दादृते सम्भवति। उभयोरविनाभावः। तदलं काव्यसंघटनाऽङ्गभूतयोः शब्दार्थयोरेकतरं प्रति स्वारस्यदर्शनेन। वस्तुतः शब्दार्थावुभौ सम्भूयैव काव्यपदमारोहतो न पुनः पृथग्भूय।'[27] इति। शब्दार्थयोः उभयोः काव्यत्वविषये ध्वनिकारानन्दवर्धनस्यापि मतं प्रदर्शयति- ''तथा च ध्वनिकार आनन्दवर्धनः- सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यत्वमिति।''[28] इति।

*वक्रोक्तिजीवते* कुन्तकाचार्य्येणापि कथ्यते- ''शब्दार्थौ काव्यं वाचको वाच्यश्चेति द्वौ सम्मिलितौ काव्यम्। द्वावेकमिति विचित्रैवोक्तिः। तेन यत्केषांचिन्मतं कविकौशलकल्पितकमनीयतातिशयः शब्द एव केवलं काव्यमिति केषांचिद् वाच्यमेव रचनावैचित्र्यचमत्कारकारि तैलं तद्विदाह्लादकारित्वं वर्तते, न पुनरेकस्मिन्।''[29] इति।

पण्डितराजजगन्नाथो *रसगङ्गाधरे* शब्दमात्रे काव्यत्वं प्रदर्शितवान्। वस्तुतः पण्डितराजेन व्याजेन शब्दार्थसमष्ट्योः काव्यत्वम् अङ्गीकृतमित्युच्यते यशोभूषणकारेण- ''यच्च महामहिमपण्डितराजैरुक्तं 'रमणीयार्थप्रतिपादकः शब्दः काव्यमि'ति तदपि व्याजान्तरेण शब्दार्थसमष्टेरेव काव्यत्वाङ्गीकरणम्। न तेनापि शब्दमात्रस्य काव्यत्वमङ्गीकृतम्। किञ्च रमणीयार्थप्रतिपादनस्यापि शब्दस्यांगीकारे शब्दार्थावेव काव्यमिति स्फुटं भवति।''[30] इति।

२. लोकोत्तरम्-

तत्किं यत्किमप्याख्यानं काव्यपदवाच्यमुत विशिष्टमेव इति चेदुच्यते लोकोत्तरमिति। एतेन काव्यत्वे रमणीयार्थत्वपक्षधारिणो रसगङ्गाधरकारस्य मन्तव्यमनुमोदितं भवति। एतच्च लोकोत्तराख्यानं भवति रससिद्धम्। लोकोत्तरतां विना काव्यत्वमाख्याने नोत्पद्यते। का तावल्लोकोत्तरता इति चेदुच्यते-

''सगुणत्वमदोषत्वं निष्प्रयत्नाऽप्यलंकृतिः।

प्रज्ञा चापि नवोन्मेषा लोकोत्तरत्वकारणम्।।''[31] इति।

आख्याने लोकोत्तरतायाः कारणम्- सगुणत्वेन, अदोषत्वेन, निष्प्रयत्नालंकृतित्वेन नवोन्मेषप्रज्ञात्वेन च।

प्राकृतवचनात् लोकोत्तरता काव्यं व्यावर्तयति। माधुर्यादिगुणानामादानेन श्रुतिकटुत्वादिदोषेभ्यो निवृत्त्या, स्वाभाविक्या अलङ्कृत्या, प्रज्ञाया नवोन्मेषेण च वाचः काव्यत्वं सम्पद्यते। लोकोत्तरताया अधिष्ठानेषु गुणादयस्तु गृह्यन्ते एव, प्रातिभदृष्टेः अपेक्षणमपि निहितम्- ‘‘प्रज्ञा चापि नवोन्मेषे‘ति कथनेन।

३. रसगर्भम्-

तच्च लोकोत्तरम् आख्यानं रससिद्धं भवेत्। एतस्य तात्पर्यं भवति यत् सद्यः अलौकिकानन्दप्रदेन रसेन प्रत्यङ्गम् अनुबिद्धं भवति। ‘रसगर्भम्’ इति पदग्रहणेन ‘वाक्यं रसात्मकं काव्यम्’ इति मतस्थापकस्य विश्वनाथकविराजस्य भावोऽनुमोदितो भवति।

४. स्वभावजम्-

काव्यं भवति स्वतःस्फूर्तं किमपि भावोच्छलनम्। यतो हि काव्यं शास्त्रवद् बहु ध्यायन् स्मरन् आयासेन वा न कोऽपि लिखति। पूर्ववर्तितः पश्चाद्वर्तितश्च आग्रहाद् विनिर्मुक्तस्य एतद्भावोच्छलनस्य स्वतःस्फूर्तत्वात् लोकोत्तरत्वाच्च स्वभावजन्यता सिध्यति। शास्त्राद्यन्यवाङ्मयवत् काव्यमेतत् कृत्रिमप्रयत्नेन न सिध्यति।

आचार्योऽयं भामहाचार्यात् मम्मटपर्यन्तं शब्दार्थसमष्ट्याः काव्यरूपेण अङ्गीकारस्य परम्पराया अनुमोदनं करोति।[32]

➢ कृतपूर्वकार्यम्-

राधावल्लभत्रिपाठि-अभिराजराजेन्द्रमिश्रमहाभागौ आधुनिकौ आलङ्कारिकौ विद्येते। तयोर्मध्ये राधावल्लभत्रिपाठी महोदयः प्राचीनः। तेन ‘लोकानुकीर्तनं काव्यम्’ इति यत् काव्यलक्षणं प्रतिपादितम्, तद् अभिराजराजेन्द्रमिश्रमहोदयेन खण्डितम्। उक्तं हि तेन- ‘‘यच्च त्रिपाठिना

राधावल्लभेनोक्तम्- लोकानुकीर्तनं काव्यम्। अनुकीर्तनं चतुर्विधम्। तेनास्य पूर्णता। पूर्णता चालङ्कारः। तेन अलङ्कार एव काव्यमिति तत्सर्वं पूर्वपरम्पाऽपुष्टत्वात् गौरवान्मानाभावाच्च चिन्त्यमेव। कुत इत्युच्यते। यद्यपि काव्यशब्दः पूर्वाचार्यैः स्वीकृतमेव काव्यनाट्ययोः स्वरूपवैशिष्ट्यविषयकमन्तरम्। आभरताद्विश्वेश्वरपण्डितं यावत् किञ्चाऽद्यतनाचार्यसमवायं यावत्काव्यनाट्यमध्यगोऽयं विशेषो यथावदङ्गीकृतः। तदस्माभिरपि नव्यैर्यथाशास्त्रं स विशेषोऽङ्गीकरणयीय एवाऽनवस्थापरिहारदृशा।''[33] इति।

पुनः अभिराजराजेन्द्रमिश्रमहाभागैः खण्डितं यत् लोकानुकीर्तनं काव्यम् इति काव्यस्य यल्लक्षणं क्रियते, तत्तु नाट्यस्य लक्षणम्, न पुनः तत्प्रतियोगिककाव्यस्वरूपं तत्।[34] तत्र प्रमाणं तावत् नाट्यशास्त्रमेव। तथाहि नाट्यशास्त्रे उच्यते- ''त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम्।''[35] इति। उक्तं चानन्तरं मिश्रमहाभागैः- ''लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् (ना. १/११२) लोकस्य चरितं नाट्यम् (ना. ३६/६) सविस्तरं भूयोऽपि-

लोको वेदस्तथाध्यात्मं प्रमाणं त्रिविधं स्मृतम्।
लोकाध्यात्मपदार्थेषु प्रायो नाट्यं व्यवस्थितम्।

तदध्यात्माभिसम्भूतं छन्दःशास्त्रसमन्वितम्।
लोकसिद्धं भवेत्सिद्धं नाट्यं लोकात्मकं त्विदम्।।

लोकस्य चरितं यत्तु नानावस्थान्तरात्मकम्।
तदङ्गाभिनयोपेतं नाट्यमित्यभिधीयते।।

तस्माल्लोकप्रमाणं हि ज्ञेयं नाट्यं प्रयोक्तृभिः।। ना. अ. २६।।''[36] इति।

एवं काव्यनाट्ययोः स्वरूपं यदि समानमेव स्यात्, तर्हि तयोर्मध्ये भेदः कः स्यात्? अत एव पूर्वाचार्याणां पूर्वव्याख्यानपरम्पराम् अपरित्यज्यैव काव्यलक्षणं करणीयम् इति राजेन्द्रमिश्रमहोदयानाम् अभिप्रायः। एवञ्च तन्मते लोकानुकीर्तनं काव्यम् इति काव्यस्य तटस्थलक्षणं स्यात्, न तु स्वरूपलक्षणम् इति।

➢ समीक्षणम्-

राधावल्लभत्रिपाठिमहोदयानां मतस्य निराकरणम् अभिराजराजेन्द्रमिश्रमहाभागैः यथायथमेव कृतम्। भरताचार्याद् आरभ्य आधुनिकान् यावत् न केनापि आलङ्कारिकेण लोकानुकीर्तनत्वरूपं काव्यलक्षणं प्रतिपादितम्। काव्यं लोकोत्तरं स्यादित्येव मम्मटादिभिः भूयो भूयः प्रतिपादितम्। पुनः लोकानुकीर्तनत्वं नाट्यस्यापि विद्यते। अतः एवंविधलक्षणस्वीकारेण काव्यनाट्ययोः कोऽपि भेद एव न स्यात्। अपि च आचार्याणाम् एवम्विधमतस्वान्त्र्यं भवति चेत् पाठकानां बुद्धभ्रमो भवेत्। अतः लोकानुकीर्तनं काव्यम् इति मतं न समीचीनम्।

➢ स्वानुशीलनम्-

मया प्राचीनानां भामहमम्मटादीनां काव्यलक्षणानि यथा अधीतानि तथा आधुनिकानां रेवाप्रसाद-राधावल्लभाद्यालङ्कारिकाणामपि। अभिराजराजेन्द्रमिश्रमहोदयाद् राधावल्लभत्रिपाठी महोदयः प्राचीन आसीत्। तस्माद् मिश्रमहाभागः स्वीयकाव्यलक्षणनिरूपणकाले त्रिपाठिमहोदयस्य काव्यलक्षणं खण्डितवान्। द्वयोः आचार्ययोः मतं सम्पूर्णतया भिन्नं वर्तते। अतः तयोर्मध्ये विरोधस्तु भवत्येव। पुनः प्राचीनमतम् अनादृत्य राधावल्लभत्रिपाठिमहोदयः स्वीयकाव्यलक्षणं कृतवान्। तेन नूतना दिशा यद्यपि उन्मुक्ता, तथापि तन्मते दोषसत्त्वात् तस्य मतं न ग्राह्यं भवति। अपरपक्षे 'काव्यं लोकोत्तरमाख्यानं रसगर्भं स्वभावजम्' इति यत् काव्यलक्षणं प्रतिपादितम् अभिराजराजेन्द्रमिश्रमहाभागैः, तत् तु विद्वद्भिः आदरणीयमेव भवति। काव्यस्य लोकोत्तरत्वं प्रायः सर्वैरेव स्वीक्रियते। आख्यानपदेन शब्दार्थयोः साहित्यं व्यज्यते। रसगर्भपदेन च काव्ये रसः तिष्ठेत्

इति सूच्यते एवञ्च स्वभावजपदेन काव्यं स्वतः एव स्फुरेत् इति कथ्यते। प्राचीनाचार्याणां मतानि विश्लिष्यन्ते चेत् काव्यस्वरूपविषये तेषामयमेव राधान्तः इति स्फुटीभवति।

- उपसंहारः-

प्राचीनकालादेव काव्यस्य स्वरूपनिरूपणे बहुधा प्रवर्तिताः काव्यतत्त्वान्वेषका आलङ्कारिकाः। तेषु केचित् शब्दार्थयोः उभयोरेव काव्यपदवाच्यतां स्वीकृतवन्तः। कैश्चित् पुनः शब्दस्यैव काव्यपदवाच्यता स्वीकृता। परन्तु आधुनिकौ आलङ्कारिकौ अभिराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठिमहोदयौ च किञ्चिद्भिन्नतया काव्यस्य स्वरूपं प्रतिपादितवन्तौ। उभयोर्मतयोर्मध्ये वैपरीत्यमपि विद्यते। तथा हि अभिराजराजेन्द्रमिश्रमहाभागैः काव्यस्य लोकोत्तरत्वं प्रतिपादितम्, परन्तु राधावल्लभत्रिपाठिमहोदयेन काव्यस्य लोकानुवर्तित्वमेव प्रतिपादितम्। त्रिपाठिमहोदयमते लोको नाम न केवलं जनो बुध्यते, अपि तु समग्रं जगदेव बुध्यते। आधिभौतिकाधिदैविकाध्यात्मिकभेदेन लोकस्य त्रैविध्यं स्वीकृतम्। एवञ्च एतेषां समेषां लोकानाम् अनुकीर्तनमेव काव्यं भवति। लोकोत्तीर्णं किमपि न भवति। त्रिपाठिमहोदयमते तु ब्रह्मणोऽपि लोकानुवर्तित्वं विद्यते। परन्तु अभिराजराजेन्द्रमिश्रमते तु काव्यं लोकोत्तरं स्यात्। आख्याने लोकोत्तरतायाः कारणं सगुणत्वेन अदोषत्वेन निष्प्रयत्नालङ्कृतित्वेन नवोन्मेषप्रज्ञात्वेन च भवति। एतेन मम्मटकुन्तकादीनां मतं समर्थितम्। परन्तु राधावल्लभत्रिपाठी महोदयस्तु प्राचीनानाम् आलङ्कारिकाणां मतमनादृत्य नूतनमेकं मतं प्रतिपादितवान् इत्येव पार्थक्यमनयोः मतयोर्मध्ये।

- निष्कर्षः-

प्राचीनानां भामहमम्मटादीनां काव्यलक्षणानि विश्लिष्यन्ते चेद् द्रष्टुं शक्यते यत्, शब्दार्थौ काव्यम्, शब्दः काव्यं चेति द्वौ पक्षौ आगच्छतः। तत्र अभिराजराजेन्द्रमिश्रमहोदयः शब्दार्थौ काव्यम् इति पक्षम् आश्रित्यैव काव्यलक्षणं कृतवान्। परन्तु राधावल्लभत्रिपाठी महोदय एतौ द्वौ पक्षौ अतिरिच्य भिन्नम् एकं स्वपरिकल्पितं पक्षम् आश्रितवान्। राधावल्लभत्रिपाठिमहोदयमते लोकानुकीर्तनं

काव्यम्। तेन लोकशब्देन सर्वेषामेव ग्रहणं क्रियते। ब्रह्मापि तन्मते लोकान्तर्गतमेव। एतन्मतं तु पारम्पारिकालङ्कारिकेभ्यो नूतनमेव। परन्तु मतमिदं कियत् युक्तिसङ्गतं तद्विचार्यम्। मम्मटादिभिः आलङ्कारिकैः उच्यते यत् काव्यपाठेन श्रवणेन वा लोकोत्तर आनन्दो जायते। लोकानुकीर्तनरूपं लक्षणं स्वीक्रियते चेत् एवञ्च लोकान्तर्गतमेव सर्वम् इति स्वीक्रियते चेत् काव्यपाठश्रवणादीनां प्रयोजनं न सिध्यति। अपरपक्षे अभिराजराजेन्द्रमिश्रमहोदयैः उच्यते यत् काव्यं लोकोत्तरं भवति। एतस्य मतं तु अङ्गीकर्तुं शक्यते एव। लोकानुकीर्तनत्वरूपलक्षणं तु नाट्यस्यापि भवति अतः काव्यलक्षणरूपेण तस्य ग्रहणं नोचितम्। अतो वक्तुं शक्यते यत् काव्यलक्षणविषये राधावल्लभत्रिपाठिमहोदयस्य मतं तथा न युक्तिसङ्गतं भवति, अपरपक्षे अभिराजराजेन्द्रमिश्रमहाभागानां मतं स्वीकर्तुं शक्यते एव इति दिक्।

➢ शोधसम्भावनाः-

अत्र मया अभिराजराजेन्द्रमिश्र-राधावल्लभत्रिपाठिमहोदययोः काव्यलक्षणविषये आलोचना कृता। तत्र राधावल्लभत्रिपाठिमहोदयस्य मतं खण्डितं मया। अभिराजराजेन्द्रमिश्रस्य मतं तु समर्थितम्। तेन शब्दार्थयोः उभयोः काव्यपदवाच्यता स्वीकृता। शब्दत्ववादिभिः आलङ्कारिकैः तस्य मतं खण्डयितुं शक्यते। आधुनिका नैके आलङ्कारिका नैकानि काव्यलक्षणानि प्रतिपादयन्ति। तेषां काव्यलक्षणैः सह एतयोः काव्यलक्षणयोः समीक्षणात्मकम् आलोचनं कर्तुं शक्यते। इतोऽपि एतयोः आलङ्कारिकयोः काव्यप्रयोजनकारणादिविषयाणां विमर्शः सम्भवतीति शम्।

---

➢ सहायकसन्दर्भस्रोतोविवरणम्-

[1] भामहविरचितः*काव्यालङ्कारः* १/१६।

[2] *काव्यालङ्कारसूत्रवृत्तिः,* सम्पा.- श्रीकृष्णभूरिः, पृ. ४।

[3] रुद्रटविरचितः *काव्यालङ्कारः* २/१।

[4] *वक्रोक्तिजीवितम्* १/७ ।

[5] *काव्यप्रकाशः,* सम्पा. भट्टवामनः, पृ.- १३।

[6] *काव्यादर्शः,* सम्पा.- श्रीरामचन्द्रमिश्रः, पृ. ६।

[7] *साहित्यदर्पणः,* सम्पा.- आचार्य कृष्णमोहन शास्त्री, पृ. २०।

[8] *रसगङ्गाधरः,* सम्पा.- विद्युत् वरण घोषः, पृ. ४६।

[9] *काव्यकौमुदी* १/२

[10] *काव्यालङ्कारकारिका,* मू.का.१।

[11] *अभिनवकाव्यालङ्कारसूत्रम्,* सू. १/१/१।

[12] *अमरकोषः,* २/१/६।

[13] *अभिनवकाव्यालङ्कारसूत्रम्,* सू. १/१/२।

[14] तत्रैव, सू. १/१/३।

[15] *तैत्तिरीयोपनिषद्-* १/७

[16] *अभिनवकाव्यालङ्कारसूत्रम्,* सम्पा.- राधावल्लभत्रिपाठी, पृ. ३।

[17] *वक्रोक्तिजीवितम्,* १/२।

[18] *काव्यप्रकाशः,*

[19] *अभिनवकाव्यालङ्कारसूत्रम्,* सम्पा.- राधावल्लभत्रिपाठी, पृ. ३।

[20] *ध्वन्यालोकः,* ४/७।

[21] *अभिनवकाव्यालङ्कारसूत्रम्,* सम्पा.- राधावल्लभत्रिपाठी, सू. १/१/४।

[22] *तदेव,* पृ. ७।

[23] *अभिराजयशोभूषणम् : ससमीक्षमधीतिः,* सम्पा.- प्रवीण पण्ड्या, पृ.- १७।

[24] *अभिराजयशोभूषणम्,* सम्पा.-अभिराजराजेन्द्रः, का. ३७।

[25] *वक्रोक्तिजीवितम्,* सम्पा.- परमेश्वरदीन पाण्डेयः, का. ७।

[26] *काव्यप्रकाशः,* सम्पा.-वामनभट्टः, पृ. १३-१४।

[27] *अभिराजयशोभूषणम्,* सम्पा.-अभिराजराजेन्द्रः, पृ. ३९।

[28] तत्रैव।

[29] *वक्रोक्तिजीवितम्,* सम्पा.- परमेश्वरदीन पाण्डेयः, पृ. १५।

[30] *अभिराजयशोभूषणम्,* सम्पा.-अभिराजराजेन्द्रः, पृ. ३८।

[31] तत्रैव, का. ३७।

[32] 'अनेनाभामहान् मम्मटं यावच्छब्दार्थयोः काव्यत्वाङ्गीकरणस्याविच्छिन्नपरम्पराया अनुमोदनम्।'- तत्रैव।

[33] *अभिराजयशोभूषणम्,* सम्पा.- अभिराजराजेन्द्रः, पृ. ४८।

[34] 'लोकानुकीर्तनं तावन्नाट्यस्वरूपं न पुनस्तत्प्रतियोगिकाव्यस्वरूपम्।'- तत्रैव।

[35] *नाट्यशास्त्रम्,* का. १/१०७।

[36] *अभिराजयशोभूषणम्,* सम्पा.- अभिराजराजेन्द्रः, पृ. ४८।

- सहायकसामग्रीविवरणम्-


1. आनन्दवर्धनः। *ध्वन्यालोकः*। सम्पा.- रामसागरः त्रिपाठी। वाराणसीः चौखम्बा विद्याभवन, २००३।
2. ---। ---। सम्पा.- सत्यनारायण चक्रवर्ती। कलकाताः संस्कृत पुस्तक भाण्डार, २०२१।
3. कुन्तकः। *वक्रोक्तिजीवितम्*। सम्पा.- परमेश्वरदीन पाण्डेय। वाराणसीः चौखम्बा सुरभारती प्रकाशन,
    a. २०२०।
4. जगन्नाथः। *रसगङ्गाधरः*। सम्पा.- विद्युत् वरण घोषः। कलकाताः पश्चिमवङ्ग राज्य पुस्तक पर्षत्, २०१९।
5. त्रिपाठी राधावल्लभः। *अभिनवकाव्यालङ्कारसूत्रम्*। सम्पा.- प्रो. राधावल्लभत्रिपाठी।

6. दण्डी। *काव्यादर्शः*। सम्पा.- रामचन्द्रमिश्रः। वाराणसी: चौखम्बा विद्याभवन, १९९६।

7. द्विवेदी रेवाप्रसादः। *काव्यालङ्कारकारिका*। वाराणसी: चौखम्बा सुरभारती प्रकाशनम्, १९७७।

8. पण्ड्या प्रवीण। अभिराजयशोभूषणम्ः। सम्पा.- प्रवीण पण्ड्या। जयपुरः राष्ट्रीय संस्कृत साहित्य केन्द्र, २०१४।

9. भरतः। *नाट्यशास्त्रम्*। सम्पा.- मधुसूदन शास्त्री। वाराणसीः वनारस हिन्दू विश्वविद्यालयः, १९७१।

10. भामहः। *काव्यालङ्कारः*। सम्पा.- देवेन्द्रनाथ शर्मा । पटना: बिहार-राष्ट्रभाषा-परिषत्, १९८५।

11. मम्मटः। *काव्यप्रकाशः*। सम्पा.- वामनभट्टः । दिल्ली: चौखम्बा संस्कृत प्रतिष्ठान, २०२१।

12. मिश्रः अभिराजराजेन्द्रः। *अभिराजयशोभूषणम्*। सम्पा.-अभिराजराजेन्द्रः। इलाहावादः वैजयन्ती प्रकाशन, २००६।

13. वामनः। *काव्यालङ्कारसूत्रवृत्तिः*। सम्पा.- श्रीकृष्णभूरिः। श्रीरङ्गनगरम्: श्रीवाणीविलासमुद्रायन्त्रालयः, १९०९।

14. विश्वनाथः। *साहित्यदर्पणः*। सम्पा.- कृष्णमोहनः शास्त्री । वाराणसीः चौखम्बा संस्कृत संस्थान, २०१८।

15. राजशेखरः। *काव्यमीमांसा*। सम्पा.- जयकृष्ण दासः, हरिदास गुप्तः। वनारसः चौखम्बा संस्कृत सीरिज आफिस, १९९१।

16. रुद्रटः। *काव्यालङ्कारः*। सम्पा.- डा. सत्यदेव चौधरी। दिल्लीः वासुदेव प्रकाशन, १९६५।

17. सिद्धान्तवागीश हरिदासः। *काव्यकौमुदी*। सम्पा.- भवेशचन्द्र भट्टाचार्यः। कलिकाताः देवलेननामकवर्त्मस्थसिद्धान्तविद्यालयः, १३६२ वङ्गाब्दः।

18. हेमचन्द्रः। *काव्यानुशासनम्*। केदारनाथः कृपाङ्गी , शिवदत्तः शर्मा, काशीनाथः शर्मा च (संशोधकाः)। मुम्बइः निर्णयसागराख्ययन्त्रालयः, १९०९।